ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

# प्रथमकाण्डे अष्टमः प्रश्नः

**Notes:**

- **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site "www.vedavms.in"**

**Version 1.0** **October 31, 2021**

# Version Notes:

**This is now the current Version 1.0 dated October 31, 2021.**

1. This replaces the earlier version 1.0 dated June 30, 2021.

2. We have listened to the Pada Parayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till October 15, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

# Previous Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st May 2019 |
| 2nd | Version Number | 0.1 dated 31st March 2020 |
| 3rd | Version Number | 0.2 dated 30th June 2020 |
| 4th | Version Number | 0.3 dated 31st Aug 2021 |
| 5th | Version Number | 1.0 dated 30th June 2021 |

Table of Contents

1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमं काण्डं .......................................... 5

1.8 प्रथमकाण्डे अष्टमः प्रश्नः – राजसूयः ........................................ 5

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः ॥ हरिः ओं

# 1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमं काण्डं

## 1.8 प्रथमकाण्डे अष्टमः प्रश्नः – राजसूयः

**TS 1.8.1.1**

अनुमत्यै पुरोडाश–मष्टाकपालं निर्वपति धेनुर्दक्षिणाये प्रत्यञ्चः
शम्याया अवशीयन्ते तं नैर्.ऋत–मेककपालं कृष्णं ँवासः कृष्णतूषं
दक्षिणा वीहि स्वाहा ऽऽहुतिं जुषाण एष ते निर्.ऋते भागो भूते
हविष्मत्यसि मुञ्चेम–म७्हसः स्वाहा नमो य इदं चकारा ऽऽदित्यं
चरुं निर्वपति वरो दक्षिणा ऽऽग्नावैष्णव–मेकादशकपालं
ँवामनो वही दक्षिणा ऽग्नीषोमीय – [ ] 1

**TS 1.8.1.1 (Padam)**

अनुमत्या इत्यनु–मत्यै । पुरोडाशम् । अष्टाकपालमित्यष्टा–कपालम् ।
निरिति । वपति । धेनुः । दक्षिणा । ये । प्रत्यञ्चः । शम्यायाः ।

अवशीयन्त इत्यव – शीयन्ते । तम् । नैर्.ऋतमिति नैः – ऋतम् ।

एककपालमित्येक – कपालम् । कृष्णम् । वासः ।

कृष्णतूषमिति कृष्ण–तूषम् । दक्षिणा । वीति । इहि । स्वाहा ।

आहुतिमित्या–हुतिम् । जुषाणः । एषः । ते । निर्.ऋत इति

निः–ऋते । भागः । भूते । हविष्मती । असि । मुञ्च । इमम् ।

अꣳहसः । स्वाहा । नमः । यः । इदम् । चकार । आदित्यम् ।

चरुम् । निरिति । वपति । वरः । दक्षिणा ।

आग्नावैष्णवमित्याग्ना – वैष्णवम् ।

एकादशकपालमित्येकादश – कपालम् । वामनः । वही । दक्षिणा ।

अग्नीषोमीयमित्यग्नी – सोमीयम् । **1 (50)**

**TS 1.8.1.2**

मेकादशकपालꣳ हिरण्यं दक्षिणैन्द्र–मेकादशकपाल–मृषभो वही

दक्षिणा ऽऽग्नेय–मष्टाकपालमैन्द्रं दद्ध्यृषभो वही दक्षिणैन्द्राग्नं

द्वादशकपालं ँवैश्वदेवं चरुं प्रथमजो वथ्सो दक्षिणा सौम्यꣳ श्यामाकं

चरुं ँवासो दक्षिणा सरस्वत्यै चरु॑ सरस्वते चरुं मिथुनौ गावौ दक्षिणा ॥ 2

**TS 1.8.1.2 (Padam)**

एकादशकपालमित्येकादश–कपालम् । हिरण्यम् । दक्षिणा । ऐन्द्रम् । एकादशकपालमित्येकादश – कपालम् । ऋषभः । वही । दक्षिणा । आग्नेयम् । अष्टाकपालमित्यष्टा–कपालम् । ऐन्द्रम् । दधि । ऋषभः । वही । दक्षिणा । ऐन्द्राग्नमित्यैन्द्र –अग्नम् । द्वादशकपालमिति द्वादश –कपालम् । वैश्वदेवमिति वैश्व – देवम् । चरुम् । प्रथमज इति प्रथम – जः । वथ्सः । दक्षिणा । सौम्यम् । श्यामाकम् । चरुम् । वासः । दक्षिणा । सरस्वत्यै । चरुम् । सरस्वते । चरुम् । मिथुनौ । गावौ । दक्षिणा ॥ 2 (34)

*(अग्नीषोमीयं–चतुस्त्रि॑शच्च)(A1)*

**TS 1.8.2.1**

आग्नेयमष्टाकपालं निर्वपति सौम्यं चरु॑ सावित्रं–द्वादशकपाल॑ सारस्वतं चरुं पौष्णं चरुं मारुत॑ सप्तकपालं ँवैश्वदेवी–मामिक्षां द्यावापृथिव्य–मेककपालं ॥ 3

**TS 1.8.2.1 (Padam)**

आग्नेयम् । अष्टाकपालमित्यष्टा–कपालम् । निरिति । वपति ।
सौम्यम् । चरुम् । सावित्रम् । द्वादशकपालमिति द्वादश–कपालम् ।
सारस्वतम् । चरुम् । पौष्णम् । चरुम् । मारुतम् । सप्तकपालमिति
सप्त –कपालम् । वैश्वदेवीमिति वैश्व – देवीम् । आमिक्षाम् ।
द्यावापृथिव्यमिति द्यावा–पृथिव्यम् । एककपालमित्येक–कपालम् ॥

3 (18) *(आग्नेयं सौम्यं मारुत–मष्टादश) (A2)*

**TS 1.8.3.1**

ऐन्द्राग्न–मेकादशकपालं मारुती–मामिक्षां वारुणी–मामिक्षां
कायमेककपालं प्रघास्यान्. हवामहे मरुतो यज्ञवाहसः
करंभेण सजोषसः ॥
मो षू ण इन्द्र पृथ्सु देवास्तु स्म ते शुष्मिन्नवया ।
मही ह्यस्य मीढुषो यव्या । हविष्मतो मरुतो वन्दते गीः ॥
यद् ग्रामे यदरण्ये यथ् सभायां यदिन्द्रिये ।
यच्छूद्रे यदर्य एनश्चकृमावयं ।
यदे ( ) कस्याधि धर्मणि तस्यावयजनमसि स्वाहा ॥

अक्रन् कर्म कर्मकृतः सह वाचा मयोभुवा ।

देवेभ्यः कर्म कृत्वा ऽस्तं प्रेत सुदानवः ॥ 4

**TS 1.8.3.1 (Padam)**

ऐन्द्राग्नमित्यैन्द्र – अग्नम् । एकादशकपालमित्येकादश–कपालम् ।

मारुतीम् । आमिक्षाम् । वारुणीम् । आमिक्षाम् । कायम् ।

एककपालमित्येक–कपालं । प्रघास्यानिति प्र–घास्यान् । हवामहे ।

मरुतः । यज्ञवाहस इति यज्ञ – वाहसः । करंभेण ।

सजोषस इति स – जोषसः ॥ मो इति । स्विति । नः । इन्द्र ।

पृथ्स्विति पृत्–सु । देव । अस्तु । स्म । ते । शुष्मिन्न् । अवया ॥

मही । हि । अस्य । मीढुषः । यव्या ॥ हविष्मतः । मरुतः । वन्दते ।

गीः ॥ यत् । ग्रामे । यत् । अरण्ये । यत् । सभायाम् । यत् ।

इन्द्रिये ॥ यत् । शूद्रे । यत् । अर्ये । एनः । चकृम । वयम् ॥

यत् ( ) । एकस्य । अधीति । धर्मणि । तस्य ।

अवयजनमित्यव–यजनम् । असि । स्वाहा ॥ अक्रन्न् । कर्म ।

कर्मकृत इति कर्म–कृतः । सह । वाचा । मयोभुवेति मयः–भुवा ॥

देवेभ्यः । कर्म । कृत्वा । अस्तम् । प्रेति । इत ।

सुदानव इति सु–दानवः ॥ **4 (70)**

*(वयं यँद्–विꣳशतिश्च) (A3)*

**TS 1.8.4.1**

अग्नये ऽनीकवते पुरोडाश–मष्टाकपालं निर्वपति साकꣳ सूर्येणोद्यता

मरुद्भ्यः सान्तपनेभ्यो मद्ध्यन्दिने चरुं मरुद्भ्यो गृहमेधिभ्यः

सर्वासां दुग्धे सायं चरुं पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत ।

वस्नेव वि क्रीणावहा इषमूर्जꣳ शतक्रतो ॥

देहि मे ददामि ते नि मे धेहि नि ते दधे ।

निहारमिन्नि मे हरा निहारं– [ ] **5**

**TS 1.8.4.1 (Padam)**

अग्नये । अनीकवत इत्यनीक – वते । पुरोडाशम् ।

अष्टाकपालमित्यष्टा–कपालम् । निरिति । वपति । साकम् । सूर्येण ।

उद्यतेत्युत् – यता । मरुद्भ्य इति मरुत् – भ्यः ।

सान्तपनेभ्य इति सां – तपनेभ्यः । मद्ध्यन्दिने । चरुम् ।

मरुद्भ्य इति मरुत्–भ्यः । गृहमेधिभ्य इति गृहमेधि–भ्यः ।

सर्वासाम् । दुग्धे । सायम् । चरुम् । पूर्णा । दर्वि । परेति । पत । सुपूर्णेति सु – पूर्णा । पुनः । एति । पत ॥ वस्ना । इव । वीति । क्रीणावहै । इषम् । ऊर्जम् । शतक्रतो इति शत–क्रतो ॥ देहि । मे । ददामि । ते । नीति । मे । धेहि । नीति । ते । दधे ॥ निहारमिति नि–हारम् । इत् । नीति । मे । हर । निहारमिति नि–हारम् । **5 (50)**

**TS 1.8.4.2**

नि हरामि ते ॥

मरुद्भ्यः क्रीडिभ्यः पुरोडाशꣳ सप्तकपालं निर्वपति साकꣳ सूर्येणोद्यता ऽऽग्नेय–मष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालꣳ सारस्वतं चरुं पौष्णं चरुमैन्द्राग्न–मेकादशकपाल–मैन्द्रं चरुं वैँश्वकर्मण–मेककपालं ॥ **6**

**TS 1.8.4.2 (Padam)**

नीति । हरामि । ते ॥ मरुद्भ्य इति मरुत् – भ्यः । क्रीडिभ्य इति क्रीडि–भ्यः । पुरोडाशम् । सप्तकपालमिति सप्त–कपालम् । निरिति । वपति । साकम् । सूर्येण । उद्यतेत्युत् – यता । आग्नेयम् । अष्टाकपालमित्यष्टा–कपालम् । निरिति । वपति ।

सौम्यम् । चरुम् । सावित्रम् । द्वादशकपालमिति द्वादश–कपालम् ।

सारस्वतम् । चरुम् । पौष्णम् । चरुम् । ऐन्द्राग्नमित्यैन्द्र – अग्नम् ।

एकादशकपालमित्येकादश – कपालम् । ऐन्द्रम् । चरुम् ।

वैश्वकर्मणमिति वैश्व – कर्मणम् ।

एककपालमित्येक–कपालम् ॥ **6 (30)** *(हरा निहारं–त्रि॒ꣳशच्च) (A4)*

**TS 1.8.5.1**

सोमाय पितृमते पुरोडाश॒ꣳ षट्कपालं निर्वपति पितृभ्यो

बर्.हिषद्भ्यो धानाः पितृभ्यो ऽग्निष्वात्तेभ्यो ऽभिवान्यायै दुग्धे

मन्थमेतत् ते तत ये च त्वा–मन्वेतत् ते पितामह प्रपितामह ये च

त्वामन्वत्र पितरो यथाभागं मन्दद्ध्व॒ꣳसुसन्दृशं त्वा वयं मघवन्

मन्दिषीमहि ।

प्रनूनं पूर्णवन्धुरः स्तुतो यासि वशा॒ꣳ अनु ।

योजा न्विन्द्र ते हरी ॥ **7**

**TS 1.8.5.1 (Padam)**

सोमाय । पितृमत इति पितृ – मते । पुरोडाशम् । षट्कपालमिति

षट् – कपालम् । निरिति । वपति । पितृभ्य इति पितृ – भ्यः ।

बर्.हिषद्भ्य इति बर्.हिषद्–भ्यः । धानाः ।

पितृभ्य इति पितृ–भ्यः । अग्निष्वात्तेभ्य इत्यग्नि–स्वात्तेभ्यः ।

अभिवान्याया इत्यभि–वान्यायै । दुग्धे । मन्थम् । एतत् । ते । तत ।

ये । च । त्वाम् । अन्विति । एतत् । ते । पितामह । प्रपितामहेति

प्र – पितामह । ये । च । त्वाम् । अन्विति । अत्र । पितरः ।

यथाभागमिति यथा – भागम् । मन्दद्ध्वम् । सुसन्दृशमिति

सु – सन्दृशम् । त्वा । वयम् । मघवन्निति मघ–वन्न् । मन्दिषीमहि ॥

प्रेति । नूनम् । पूर्णवन्धुर इति पूर्ण – वन्धुरः । स्तुतः । यासि ।

वशान् । अनु ॥ योजा । नु । इन्द्र । ते । हरी इति ॥ **7 (50)**

**<u>TS 1.8.5.2</u>**

अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।

अस्तोषत स्वभानवो विप्रा नविष्ठया मती ।

योजा न्विन्द्र ते हरी ॥

अक्षन् पितरो ऽमीमदन्त पितरो ऽतीतृपन्त पितरो ऽमीमृजन्त पितरः ॥

परेत पितरः सोम्या गम्भीरैः पथिभिः पूर्व्यैः ।

अथा पितृन्थ् सुविदत्रा॰ं अपीत यमेन ये सधमादं मदन्ति ॥
मनो न्वा हुवामहे नाराश॰ंसेन स्तोमेन पितृणां च मन्मभिः ॥
आ – [ ] 8

**TS 1.8.5.2 (Padam)**

अक्षन्न् । अमीमदन्त । हि । अवेति । प्रियाः । अधूषत ॥ अस्तोषत । स्वभानव इति स्व–भानवः । विप्राः । नविष्ठया । मती ॥ योजा । नु । इन्द्र । ते । हरी इति ॥ अक्षन्न् । पितरः । अमीमदन्त । पितरः । अतीतृपन्त । पितरः । अमीमृजन्त । पितरः ॥ परेति । इत । पितरः । सोम्याः । गंभीरैः । पथिभिरिति पथि–भिः । पूर्व्यैः ॥ अथ । पितृन् । सुविदत्रानिति सु – विदत्रान् । अपीति । इत । यमेन । ये । सधमादमिति सध – मादम् । मदन्ति ॥ मनः । नु । एति । हुवामहे । नाराश॰ंसेन । स्तोमेन । पितृणाम् । च । मन्मभिरिति मन्म – भिः ॥ एति । **8 (50)**

**TS 1.8.5.3**

न एतु मनः पुनः क्रत्वे दक्षाय जीवसे ।
ज्योक् च सूर्यं दृशे ॥

पुनर्नः पितरो मनो ददातु दैव्यो जनः ।

जीवं ँव्रातꣳ सचेमहि ॥

यदन्तरिक्षं पृथिवीमुत द्यां ँयन्मातरं पितरं ँवा जिहिꣳसिम ।

अग्निर्मा तस्मादेनसो गार्.हपत्यः प्र मुञ्चतु दुरिता यानि चकृम

करोतु मा–मनेनसं ॥ **9**

**<u>TS 1.8.5.3 (Padam)</u>**

नः । एतु । मनः । पुनः । क्रत्वे । दक्षाय । जीवसे ॥ ज्योक् । च ।

सूर्यम् । दृशे ॥ पुनः । नः । पितरः । मनः । ददातु । दैव्यः ।

जनः ॥ जीवम् । व्रातम् । सचेमहि ॥ यत् । अन्तरिक्षम् । पृथिवीम् ।

उत । द्याम् । यत् । मातरम् । पितरम् । वा । जिहिꣳसिम ॥ अग्निः ।

मा । तस्मात् । एनसः । गार्.हपत्य इति गार्.ह–पत्यः । प्रेति ।

मुञ्चतु । दुरितेति दुः – इता । यानि । चकृम । करोतु । माम् ।

अनेनसम् ॥ **9 (44)**

*(हरी–मन्मभिरा–चतुश्चत्वारिꣳशच्च) (A5)*

**TS 1.8.6.1**

प्रतिपूरुषमेककपालान्निर्वपत्येक–मतिरिक्तं ँयावन्तो गृह्याः

स्मस्तेभ्यः कमकरं पशूना९ँ शर्मासि शर्म यजमानस्य शर्म मे

यच्छैक एव रुद्रो न द्वितीयाय तस्थ आखुस्ते रुद्र पशुस्तं जुषस्वैष

ते रुद्र भागः सह स्वस्राऽम्बिकया तं जुषस्व भेषजं गवेऽश्वाय

पुरुषाय भेषजमथो अस्मभ्यं भेषज९ँ सुभेषजं – [ ] **10**

**TS 1.8.6.1 (Padam)**

प्रतिपूरुषमिति प्रति–पूरुषम् । एककपालानित्येक–कपालान् ।

निरिति । वपति । एकम् । अतिरिक्तमित्यति–रिक्तम् । यावन्तः ।

गृह्याः । स्मः । तेभ्यः । कम् । अकरम् । पशूनाम् । शर्म । असि ।

शर्म । यजमानस्य । शर्म । मे । यच्छ । एकः । एव । रुद्रः । न ।

द्वितीयाय । तस्थे । आखुः । ते । रुद्र । पशुः । तम् । जुषस्व ।

एषः । ते । रुद्र । भागः । सह । स्वस्रा । अंबिकया । तम् ।

जुषस्व । भेषजम् । गवे । अश्वाय । पुरुषाय । भेषजम् ।

अथो इति । अस्मभ्यमित्यस्म–भ्यम् । भेषजम् ।

सुभेषजमिति सु – भेषजम् । **10 (50)**

**TS 1.8.6.2**

यँथा ऽसति ।

सुगं मेषाय मेष्या अवांब रुद्र–मदिमह्यव देवं त्र्यंबकं ।

यथा नः श्रेयसः करद्यथा नो वस्यसः करद्यथा नः पशुमतः

करद्यथा नो व्यवसाययात् ॥

त्र्यंबकं यँजामहे सुगन्धिं पुष्टिवर्द्धनं ।

उर्वारुकमिव बन्धनान् मृत्यो र्मुक्षीय मा ऽमृतात् ॥

एष ते रुद्र भागस्तं जुषस्व तेनावसेन परो मूजवतो ऽतीह्य ( )

वततधन्वा पिनाकहस्तः कृत्तिवासाः ॥ **11**

**TS 1.8.6.2 (Padam)**

यथा । असति ॥ सुगमिति सु–गम् । मेषाय । मेष्यै । अवेति ।

अंब । रुद्रम् । अदिमहि । अवेति । देवम् ।

त्र्यंबकमिति त्रि–अंबकम् ॥ यथा । नः । श्रेयसः । करत् । यथा ।

नः । वस्यसः । करत् । यथा । नः । पशुमत इति पशु – मतः ।

करत् । यथा । नः । व्यवसाययादिति वि – अवसाययात् ॥

त्र्यंबकमिति त्रि – अंबकम् । यजामहे । सुगन्धिमिति सु–गन्धिम् ।

पुष्टिवर्द्धनमिति पुष्टि–वर्द्धनम् ॥ उर्वारुकम् । इव । बन्धनात् ।
मृत्योः । मुक्षीय । मा । अमृतात् ॥ एषः । ते । रुद्र । भागः । तम् ।
जुषस्व । तेन । अवसेन । परः । मूजवत इति मूज – वतः ।
अतीति । इहि ( ) । अवततधन्वेत्यवतत – धन्वा । पिनाकहस्त इति
पिनाक – हस्तः । कृत्तिवासा इति कृत्ति – वासाः ॥ **11 (53)**

*(सुभेषज–मिहि त्रीणि च) (A6)*

**TS 1.8.7.1**

ऐन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुमिन्द्राय शुनासीराय पुरोडाशं
द्वादशकपालं वायव्यं पयः सौर्यमेककपालं द्वादशगवꣳ सीरं दक्षिणा
ऽऽग्नेय–मष्टाकपालं निर्वपति रौद्रं गावीधुकं चरुमैन्द्रं दधि वारुणं
यवमयं चरुं वहिनी धेनुर्दक्षिणा ये देवाः पुरस्सदो ऽग्निनेत्रा
दक्षिणसदो यमनेत्राः पश्चात्सदः सवितृनेत्रा उत्तरसदो
वरुणनेत्रा उपरिषदो बृहस्पतिनेत्रा रक्षोहणस्ते नः पान्तु ते नो ऽवन्तु
तेभ्यो – [ ] **12**

**TS 1.8.7.1 (Padam)**

ऐन्द्राग्नमित्यैन्द्र – अग्नम् । द्वादशकपालमिति द्वादश – कपालम् ।
वैश्वदेवमिति वैश्व–देवम् । चरुम् । इन्द्राय । शुनासीराय ।
पुरोडाशम् । द्वादशकपालमिति द्वादश – कपालम् ।
वायव्यम् । पयः । सौर्यम् । एककपालमित्येक – कपालम् ।
द्वादशगवमिति द्वादश – गवम् । सीरम् । दक्षिणा । आग्नेयम् ।
अष्टाकपालमित्यष्टा – कपालम् । निरिति । वपति । रौद्रम् ।
गावीधुकम् । चरुम् । ऐन्द्रम् । दधि । वारुणम् ।
यवमयमिति यव–मयम् । चरुम् । वहिनी । धेनुः । दक्षिणा । ये ।
देवाः । पुरस्सद इति पुरः – सदः । अग्निनेत्रा इत्यग्नि – नेत्राः ।
दक्षिणसद इति दक्षिण – सदः । यमनेत्रा इति यम – नेत्राः ।
पश्चाथ्सद इति पश्चात् – सदः । सवितृनेत्रा इति सवितृ – नेत्राः ।
उत्तरसद इत्युत्तर – सदः । वरुणनेत्रा इति वरुण – नेत्राः ।
उपरिषद इत्युपरि – सदः । बृहस्पतिनेत्रा इति बृहस्पति – नेत्राः ।

रक्षोहण इति रक्षः – हनः । ते । नः । पान्तु । ते । नः ।

अवन्तु । तेभ्यः । **12 (50)**

**TS 1.8.7.2**

नमस्तेभ्यः स्वाहा समूढꣳ रक्षः सन्दग्धꣳरक्ष इदमहꣳ रक्षो ऽभि

सं दहाम्यग्नये रक्षोघ्ने स्वाहा यमाय सवित्रे वरुणाय बृहस्पतये

दुवस्वते रक्षोघ्ने स्वाहा प्रष्टिवाही रथो दक्षिणा देवस्य त्वा सवितुः

प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ रक्षसो वधं जुहोमि हतꣳ

रक्षो ऽवधिष्म रक्षो यद्वस्ते तद्दक्षिणा ॥ **13**

**TS 1.8.7.2 (Padam)**

नमः । तेभ्यः । स्वाहा । समूढमिति सं – ऊढम् । रक्षः ।

सन्दग्धमिति सं–दग्धम् । रक्षः । इदम् । अहम् । रक्षः । अभि ।

समिति । दहामि । अग्नये । रक्षोघ्न इति रक्षः – घ्ने । स्वाहा ।

यमाय । सवित्रे । वरुणाय । बृहस्पतये । दुवस्वते । रक्षोघ्न इति

रक्षः–घ्ने । स्वाहा । प्रष्टिवाहीति प्रष्टि–वाही । रथः । दक्षिणा ।

देवस्य । त्वा । सवितुः । प्रसव इति प्र – सवे । अश्विनोः ।

बाहुभ्यामिति बाहु–भ्याम् । पूष्णः । हस्ताभ्याम् । रक्षसः । वधम् ।

जुहोमि । हतम् । रक्षः । अवधिष्म । रक्षः । यत् । वस्ते । तत् ।
दक्षिणा ॥ **13 (45)** *(तेभ्यः–पञ्चचत्वारिꣳशच्च) (A7)*

**TS 1.8.8.1**

धात्रे पुरोडाशं द्वादशकपालं निर्वपत्यनुमत्यै चरुꣳ राकायै चरुꣳ
सिनीवाल्यै चरुं कुह्वै चरुं मिथुनौ गावौ दक्षिणा
ऽऽग्नावैष्णवमेकादशकपालं निर्वपत्यैन्द्रावैष्णवमेकादशकपालं
ँवैष्णवं त्रिकपालं ँवामनो वही दक्षिणा ऽग्नीषोमीय–मेकादशकपालं
निर्वपतीन्द्रासोमीय–मेकादशकपालꣳ सौम्यं चरुं बभ्रुर्दक्षिणा
सोमापौष्णं चरुं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुꣳ श्यामो दक्षिणा
वैश्वानरं द्वादशकपालं नि ( ) र्वपति हिरण्यं दक्षिणा वारुणं ँयवमयं
चरुमश्वोदक्षिणा । **14**

**TS 1.8.8.1 (Padam)**

धात्रे । पुरोडाशम् । द्वादशकपालमिति द्वादश – कपालम् । निरिति ।
वपति । अनुमत्या इत्यनु – मत्यै । चरुम् । राकायै । चरुम् ।
सिनीवाल्यै । चरुम् । कुह्वै । चरुम् । मिथुनौ । गावौ । दक्षिणा ।
आग्नावैष्णवमित्याग्ना –वैष्णवम् ।

एकादशकपालमित्येकादश – कपालम् । निरिति । वपति ।

ऐन्द्रावैष्णवमित्यैन्द्रा – वैष्णवम् ।

एकादशकपालमित्येकादश – कपालम् । वैष्णवम् ।

त्रिकपालमिति त्रि – कपालम् । वामनः । वही । दक्षिणा ।

अग्नीषोमीयमित्यग्नी – सोमीयम् ।

एकादशकपालमित्येकादश – कपालम् ।

निरिति । वपति । इन्द्रासोमीयमितीन्द्रा – सोमीयम् ।

एकादशकपालमित्येकादश – कपालम् । सौम्यम् । चरुम् । बभ्रुः ।

दक्षिणा । सोमापौष्णमिति सोमा – पौष्णम् । चरुम् । निरिति ।

वपति । ऐन्द्रापौष्णमित्यैन्द्रा – पौष्णम् । चरुम् । पौष्णम् । चरुम् ।

श्यामः । दक्षिणा । वैश्वानरम् । द्वादशकपालमिति द्वादश–कपालम् ।

निरिति ( ) । वपति । हिरण्यम् । दक्षिणा । वारुणम् ।

यवमयमिति यव – मयम् । चरुम् । अश्वः । दक्षिणा ॥ **14 (58)**

*(वैश्वानरं द्वादशकपालं नि–रष्टौ च) (A8)*

**TS 1.8.9.1**

बार्.हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे शितिपृष्ठो दक्षिणैन्द्र–

मेकादशकपाल॑ राजन्यस्य गृह ऋषभो दक्षिणा ऽऽदित्यं चरुं

महिष्यै गृहे धेनुर्दक्षिणानैर्.ऋतं चरुं परिवृक्त्यै गृहे कृष्णानां

ँव्रीहीणां नखनिर्भिन्नं कृष्णा कूटा दक्षिणा ऽऽग्नेयमष्टाकपाल॑

सेनान्यो गृहे हिरण्यं दक्षिणा वारुणं दशकपाल॑ सूतस्य गृहे

महानिरष्टो दक्षिणा मारुत॑ सप्तकपालं ग्रामण्यो गृहे पृश्ञिर्दक्षिणा

सावित्रं द्वादशकपालं – [ ] **15**

**TS 1.8.9.1 (Padam)**

बार्.हस्पत्यम् । चरुम् । निरिति । वपति । ब्रह्मणः । गृहे ।

शितिपृष्ठ इति शिति – पृष्ठः । दक्षिणा । ऐन्द्रम् ।

एकादशकपालमित्येकादश–कपालम् । राजन्यस्य । गृहे । ऋषभः ।

दक्षिणा । आदित्यम् । चरुम् । महिष्यै । गृहे । धेनुः । दक्षिणा ।

नैर्.ऋतमिति नैः–ऋतम् । चरुम् । परिवृक्त्या इति परि–वृक्त्यै ।

गृहे । कृष्णानाम् । व्रीहीणाम् । नखनिर्भिन्नमिति नख–निर्भिन्नम् ।

कृष्णा । कूटा । दक्षिणा । आग्नेयम् ।

अष्टाकपालमित्यष्टा – कपालम् । सेनान्य इति सेना – न्यः । गृहे । हिरण्यम् । दक्षिणा । वारुणम् । दशकपालमिति दश–कपालम् । सूतस्य । गृहे । महानिरष्ट इति महा–निरष्टः । दक्षिणा । मारुतम् । सप्तकपालमिति सप्त – कपालम् । ग्रामण्य इति ग्राम – न्यः । गृहे । पृश्ञिः । दक्षिणा । सावित्रम् । द्वादशकपालमिति द्वादश – कपालम् । **15 (50)**

**TS 1.8.9.2**

क्षत्तुर्गृह उपद्ध्वस्तो दक्षिणा ऽऽश्विनं द्विकपाल ँ सङ्ग्रहीतुर्गृहे सवात्यौ दक्षिणा पौष्णं चरुं भागदुघस्य गृहे श्यामो दक्षिणा रौद्रं गावीधुकं चरुमक्षावापस्य गृहे शबल उद्वारो दक्षिणेन्द्राय सुत्राम्णे पुरोडाश–मेकादशकपालं प्रति निर्वपतीन्द्राया ँ होमुचे ऽयं नो राजा वृत्रहा राजा भूत्वा वृत्रं ँ वद्ध्यान् मैत्राबार्.हस्पत्यं भवति श्वेतायै श्वेतवथ्सायै दुग्धे स्वयंमूर्ते स्वयंमथित आज्य आश्वत्थे – [ ] **16**

**TS 1.8.9.2 (Padam)**

क्षत्तुः । गृहे । उपद्ध्वस्त इत्युप – ध्वस्तः । दक्षिणा । आश्विनम् । द्विकपालमिति द्वि – कपालम् । सङ्ग्रहीतुरिति सं–ग्रहीतुः । गृहे ।

सवात्याविति स – वात्यौ । दक्षिणा । पौष्णम् । चरुम् ।

भागदुघस्येति भाग – दुघस्य । गृहे । श्यामः । दक्षिणा । रौद्रम् ।

गावीधुकम् । चरुम् । अक्षावापस्येत्यक्ष – आवापस्य । गृहे ।

शबलः । उद्वार इत्युत् – वारः । दक्षिणा । इन्द्राय । सुत्रांण इति

सु – त्रांणे । पुरोडाशम् । एकादशकपालमित्येकादश – कपालम् ।

प्रति । निरिति । वपति । इन्द्राय । अ॒ꣳहोमुच इत्य॒ꣳहः–मुचे ।

अयम् । नः । राजा । वृत्रहेति वृत्र–हा । राजा । भूत्वा । वृत्रम् ।

वद्ध्यात् । मैत्राबार्.हस्पत्यमिति मैत्रा–बार्.हस्पत्यम् । भवति ।

श्वेतायै । श्वेतवथ्साया इति श्वेत–वथ्सायै । दुग्धे ।

स्वयंमूर्त इति स्वयम्–मूर्ते । स्वयंमथित इति स्वयं – मथिते ।

आज्ये । आश्वत्थे । **16 (50)**

**<u>TS 1.8.9.3</u>**

पात्रे चतुस्स्रक्तौ स्वयमवपन्नायै शाखायै कर्णा॑ꣳश्चाकर्णा॑ꣳश्च

तण्डुलान्. वि चिनुयाद् ये कर्णाः स पयसि बार्.हस्पत्यो ये ऽकर्णाः

स आज्ये मैत्रः स्वयंकृता वेदिर्भवति स्वयन्दिनं बर्.हिः

स्वयंकृत इद्ध्मः सैव श्वेता श्वेतवथ्सा दक्षिणा ॥ 17

**TS 1.8.9.3 (Padam)**

पात्रे । चतुस्स्रक्ताविति चतुः – स्रक्तौ । स्वयमवपन्नाया इति

स्वयं–अवपन्नायै । शाखायै । कर्णान् । च । अकर्णान् । च ।

तण्डुलान् । वीति । चिनुयात् । ये । कर्णाः । सः । पयसि ।

बार्.हस्पत्यः । ये । अकर्णाः । सः । आज्ये । मैत्रः ।

स्वयंकृतेति स्वयम् – कृता । वेदिः । भवति । स्वयन्दिनमिति

स्वयं – दिनम् । बर्.हिः । स्वयंकृत इति स्वयं – कृतः । इद्ध्मः ।

सा । एव । श्वेता । श्वेतवथ्सेति श्वेत – वथ्सा । दक्षिणा ॥ 17 (33)

*(सावित्रं द्वादशकपाल–माश्वत्थे त्रयस्त्रिꣳशच्च) (A9)*

**TS 1.8.10.1**

अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाꣳ

सोमाय वनस्पतये श्यामाकं चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं

द्वादशकपाल–माशूनां व्रीहीणाꣳ रुद्राय पशुपतये गावीधुकं चरुं

बृहस्पतये वाचस्पतये नैवारं चरुमिन्द्राय ज्येष्ठाय पुरोडाश–

मेकादशकपालं महाव्रीहीणां मित्राय सत्याया ऽऽम्बानां चरुं
ँवरुणाय धर्मपतये यवमयं चरु॒ँ सविता त्वा प्रसवाना॒ँ
सुवतामग्नि र्गृहपतीना॒ँ सोमो वनस्पतीना॒ँ रुद्रः पशूनां– [ ] 18

**TS 1.8.10.1 (Padam)**

अग्नये । गृहपतय इति गृह – पतये । पुरोडाशम् ।
अष्टाकपालमित्यष्टा – कपालम् । निरिति । वपति । कृष्णानाम् ।
व्रीहीणाम् । सोमाय । वनस्पतये । श्यामाकम् । चरुम् । सवित्रे ।
सत्यप्रसवायेति सत्य – प्रसवाय । पुरोडाशम् । द्वादशकपालमिति
द्वादश – कपालम् । आशूनाम् । व्रीहीणाम् । रुद्राय । पशुपतय इति
पशु – पतये । गावीधुकम् । चरुम् । बृहस्पतये । वाचः । पतये ।
नैवारम् । चरुम् । इन्द्राय । ज्येष्ठाय । पुरोडाशम् ।
एकादशकपालमित्येकादश – कपालम् ।
महाव्रीहीणामिति महा–व्रीहीणाम् । मित्राय । सत्याय । आंबानाम् ।
चरुम् । वरुणाय । धर्मपतय इति धर्म – पतये ।
यवमयमिति यव – मयम् । चरुम् । सविता । त्वा ।

प्रसवानामिति प्र – सवानाम् । सुवताम् । अग्निः । गृहपतीनामिति

गृह – पतीनाम् । सोमः । वनस्पतीनाम् । रुद्रः । पशूनाम् । **18 (50)**

**TS 1.8.10.2**

बृहस्पति र्वाचामिन्द्रो ज्येष्ठानां मित्रः सत्यानां ँवरुणो

धर्मपतीनां ँये देवा देवसुवः स्थ त इम–मामुष्यायण–मनमित्राय

सुवद्ध्वं महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो

भरता राजा सोमो ऽस्माकं ब्राह्मणाना॒ राजा प्रति त्यन्नाम

राज्य–मधायि स्वां तनुवं ँवरुणो अशिश्रेच्छुचेर्मित्रस्य

व्रत्या अभूमामन्महि महत ऋतस्य नाम सर्वे व्राता ( )

वरुणस्याभूवन् वि मित्र एवै–रराति–मतारीदसूषुदन्त यज्ञिया ऋतेन

व्यु त्रितो जरिमाणं न आनड् विष्णोः क्रमो ऽसि विष्णोः

क्रान्तमसि विष्णोर्विक्रान्त–मसि ॥ **19**

**TS 1.8.10.2 (Padam)**

बृहस्पतिः । वाचम् । इन्द्रः । ज्येष्ठानाम् । मित्रः । सत्यानाम् ।

वरुणः । धर्मपतीनामिति धर्म – पतीनाम् । ये । देवाः । देवसुव

इति देव – सुवः । स्थ । ते । इमम् । आमुष्यायणम् । अनमित्राय ।

सुवद्ध्वम् । महते । क्षत्राय । महते । आधिपत्यायेत्याधि–पत्याय ।
महते । जानराज्यायेति जान–राज्याय । एषः । वः । भरताः । राजा ।
सोमः । अस्माकम् । ब्राह्मणानाम् । राजा । प्रतीति । त्यत् । नाम ।
राज्यम् । अधायि । स्वाम् । तनुवम् । वरुणः । अशिश्रेत् । शुचेः ।
मित्रस्य । व्रत्याः । अभूम । अमन्महि । महतः । ऋतस्य । नाम ।
सर्वे । व्राताः ( ) । वरुणस्य । अभूवन्न् । वीति । मित्रः । एवैः ।
अरातिम् । अतारीत् । असूषुदन्त । यज्ञियाः । ऋतेन । वीति । उ ।
त्रितः । जरिमाणम् । नः । आनट् । विष्णोः । क्रमः । असि ।
विष्णोः । क्रान्तम् । असि । विष्णोः । विक्रान्तमिति वि – क्रान्तम् ।
असि ॥ **19 (75)** *(पशूनां–व्राँताः–पञ्चविꣳशतिश्च) (A10 )*

**TS 1.8.11.1**

अर्थेतः स्थापां पतिरसि वृषा ऽस्यूर्मि र्वृषसेनो ऽसि व्रजक्षितः स्थ
मरुतामोजः स्थ सूर्यवर्चसः स्थ सूर्यत्वचसः स्थ मान्दाः स्थ
वाशाः स्थ शक्वरीः स्थ विश्वभृतः स्थ जनभृतः
स्थाग्नेस्तेजस्याः स्थापामोषधीनाꣳ रसः स्थापो

देवीर्मधुमती–रगृह्णन्नूर्जस्वती राजसूयाय चितानाः ।
याभि र्मित्रावरुणाव–भ्यषिञ्चन्. याभि–रिन्द्र–मनयन्नत्य–( )–रातीः ॥
राष्ट्रदाः स्थ राष्ट्रं दत्त स्वाहा राष्ट्रदाः स्थ राष्ट्रममुष्मै दत्त ॥ **20**

**TS 1.8.11.1 (Padam)**

अर्थेत इत्यर्थ–इतः । स्थ । अपाम् । पतिः । असि । वृषा ।
असि । ऊर्मिः । वृषसेन इति वृष–सेनः । असि ।
व्रजक्षित इति व्रज–क्षितः । स्थ । मरुताम् । ओजः । स्थ ।
सूर्यवर्चस इति सूर्य – वर्चसः । स्थ । सूर्यत्वचस इति
सूर्य – त्वचसः । स्थ । मान्दाः । स्थ । वाशाः । स्थ । शक्वरीः ।
स्थ । विश्वभृत इति विश्व – भृतः । स्थ । जनभृत इति
जन–भृतः । स्थ । अग्नेः । तेजस्याः । स्थ । अपाम् ।
ओषधीनाम् । रसः । स्थ । अपः ।
देवीः । मधुमतीरिति मधु – मतीः । अगृह्णन् । ऊर्जस्वतीः ।
राजसूयायेति राज – सूयाय । चितानाः ॥ याभिः । मित्रावरुणाविति
मित्रा–वरुणौ । अभ्यषिञ्चन्नित्यभि–असिञ्चन् । याभिः । इन्द्रम् ।

अनयन्न् । अतीति ( ) । अरातीः ॥ राष्ट्रदा इति राष्ट्र–दाः । स्थ ।
राष्ट्रम् । दत्त । स्वाहा । राष्ट्रदा इति राष्ट्र – दाः । स्थ । राष्ट्रम् ।
अमुष्मै । दत्त ॥ **20 (61)** *(अत्ये–कादश च) (A11)*

**TS 1.8.12.1**

देवीरापः सं मधुमतीर्मधुमतीभिः सृज्यद्ध्वं महि वर्चः क्षत्रियाय
वन्वाना अनाधृष्टाः सीदतोर्जस्वतीर्महि वर्चः क्षत्रियाय
दधतीरनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसिशुक्रा वः
शुक्रेणोत्पुनामि चन्द्राश्चन्द्रेणामृता अमृतेन स्वाहा राजसूयाय
चितानाः ॥
सधमादो द्युम्निनीरूर्ज एता अनिभृष्टा अपस्युवो वसानः ।
पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशु – [ ] **21**

**TS 1.8.12.1 (Padam)**

देवीः । आपः । समिति । मधुमतीरिति मधु– मतीः । मधुमतीभिरिति
मधु–मतीभिः । सृज्यद्ध्वम् । महि । वर्चः । क्षत्रियाय । वन्वानाः ।
अनाधृष्टा इत्यना–धृष्टाः । सीदत । ऊर्जस्वतीः । महि । वर्चः ।
क्षत्रियाय । दधतीः । अनिभृष्टमित्यनि–भृष्टम् । असि । वाचः ।

बन्धुः । तपोजा इति तपः - जाः । सोमस्य । दात्रम् । असि ।

शुक्राः । वः । शुक्रेण । उदिति । पुनामि । चन्द्राः । चन्द्रेण ।

अमृताः । अमृतेन । स्वाहा । राजसूयायेति राज - सूयाय ।

चितानाः ॥ सधमाद इति सध-मादः । द्युम्निनीः । ऊर्जः । एताः ।

अनिभृष्टा इत्यनि-भृष्टाः । अपस्युवः । वसानः ॥ पस्त्यासु । चक्रे ।

वरुणः । सधस्थमिति सध - स्थम् । अपाम् । शिशुः । **21 (50)**

**TS 1.8.12.2**

र्मातृतमास्वन्तः ॥

क्षत्रस्योल्बमसि क्षत्रस्य योनिरस्याविन्नो अग्नि र्गृहपतिराविन्न इन्द्रो

वृद्धश्रवा आविन्नः पूषा विश्ववेदा आविन्नौ मित्रावरुणा

वृतावृधावाविन्ने द्यावापृथिवी धृतव्रते आविन्ना

देव्यदिति र्विश्वरूप्याविन्नो ऽयमसावामुष्यायणो ऽस्यां ँविश्यस्मिन्

राष्ट्रे महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता

राजा सोमो ऽस्माकं ब्राह्मणाना९ राजेन्द्रस्य - [ ] **22**

**TS 1.8.12.2 (Padam)**

मातृतमास्विति मातृ – तमासु । अन्तः ॥ क्षत्रस्य । उल्बम् । असि ।
क्षत्रस्य । योनिः । असि । आविन्नः । अग्निः । गृहपतिरिति
गृह–पतिः । आविन्नः । इन्द्रः । वृद्धश्रवा इति वृद्ध–श्रवाः ।
आविन्नः । पूषा । विश्ववेदा इति विश्व – वेदाः ।
आविन्नौ । मित्रावरुणाविति मित्रा – वरुणौ । ऋतावृधावित्यृत–वृधौ ।
आविन्ने इति । द्यावापृथिवी इति द्यावा – पृथिवी । धृतव्रते इति
धृत – व्रते । आविन्ना । देवी । अदितिः । विश्वरूपीति विश्व–रूपी ।
आविन्नः । अयम् । असौ । आमुष्यायणः । अस्याम् । विशि ।
अस्मिन्न् । राष्ट्रे । महते । क्षत्राय । महते ।
आधिपत्यायेत्याधि–पत्याय । महते । जानराज्यायेति जान–राज्याय ।
एषः । वः । भरताः । राजा । सोमः । अस्माकम् । ब्राह्मणानाम् ।
राजा । इन्द्रस्य । **22 (50)**

**TS 1.8.12.3**

वज्रो ऽसि वार्त्रघ्नस्त्वया ऽयं वृत्रं वद्ध्याच्छत्रुबाधनाः स्थपात मा
प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पात दिग्भ्यो मा पात विश्वाभ्यो

मा नाष्ट्राभ्यः पात हिरण्यवर्णा–वुषसां ँविरोके ऽयस्स्थूणा–वुदितौ सूर्यस्याऽऽ रोहतं ँवरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च ॥ **23**

**TS 1.8.12.3 (Padam)**

वज्रः । असि । वार्त्रघ्न इति वार्त्र – घ्नः । त्वया । अयम् । वृत्रम् । वद्ध्यात् । शत्रुबाधना इति शत्रु–बाधनाः । स्थ । पात । मा । प्रत्यञ्चम् । पात । मा । तिर्यञ्चम् । अन्वञ्चम् । मा । पात । दिग्भ्य इति दिक्–भ्यः । मा । पात । विश्वाभ्यः । मा । नाष्ट्राभ्यः । पात । हिरण्यवर्णाविति हिरण्य – वर्णौ । उषसाम् । विरोक इति वि – रोके । अयस्स्थूणावियय: – स्थूणौ । उदिताविमुत् – इतौ । सूर्यस्य । एति । रोहतम् । वरुण । मित्र । गर्तम् । ततः । चक्षाथाम् । अदितिम् । दितिम् । च ॥ **23 (41)**

*(शिशु–रिन्द्रस्यै–कचत्वारि९शच्च) (A12)*

**TS 1.8.13.1**

समिधमा तिष्ठ गायत्री त्वा छन्दसामवतु त्रिवृथ्स्तोमो रथन्तर९ सामाग्निर्देवता ब्रह्म द्रविणमुग्रामा तिष्ठ त्रिष्टुप् त्वा छन्दसामवतु पञ्चदशस्स्तोमो बृहथ् सामेन्द्रो देवता क्षत्रं द्रविणं ँविराजमा तिष्ठ

जगती त्वा छन्दसामवतु सप्तदशस्स्तोमो वैरूप ँ साम मरुतो देवता विड् द्रविण–मुदीचीमा–तिष्ठानुष्टुप् त्वा – [ ] **24**

**TS 1.8.13.1 (Padam)**

समिधमिति सं–इधम् । एति । तिष्ठ । गायत्री । त्वा । छन्दसाम् । अवतु । त्रिवृदिति त्रि–वृत् । स्तोमः । रथन्तरमिति रथं–तरम् । साम । अग्निः । देवता । ब्रह्म । द्रविणम् । उग्राम् । एति । तिष्ठ । त्रिष्टुप् । त्वा । छन्दसाम् । अवतु । पञ्चदश इति पञ्च–दशः । स्तोमः । बृहत् । साम । इन्द्रः । देवता । क्षत्रम् । द्रविणम् । विराजमिति वि–राजम् । एति । तिष्ठ । जगती । त्वा । छन्दसाम् । अवतु । सप्तदश इति सप्त–दशः । स्तोमः । वैरूपम् । साम । मरुतः । देवता । विट् । द्रविणम् । उदीचीम् । एति । तिष्ठ । अनुष्टुबित्यनु – स्तुप् । त्वा । **24 (50)**

**TS 1.8.13.2**

छन्दसा–मवत्वेकवि ँ शः स्तोमो वैराज ँ साम मित्रावरुणौ देवता बलं द्रविण–मूर्द्ध्वामा तिष्ठ पङ्क्तिस्त्वा छन्दसामवतु त्रिणवत्रयस्त्रि ँ शौ स्तोमौ शाक्वररैवते सामनी बृहस्पतिर्देवता वर्चो

द्रविण–मीदृङ् चान्यादृङ् चैतादृङ् च प्रतिदृङ् च मितश्च संमितश्च सभराः ।

शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मा॑श्च सत्यश्चर्तपाश्चा – [ ] 25

**TS 1.8.13.2 (Padam)**

छन्दसाम् । अवतु । एकवि॒ꣳश इत्येक–वि॒ꣳशः । स्तोमः । वैराजम् । साम । मित्रावरुणाविति मित्रा – वरुणौ । देवता । बलम् । द्रविणम् । ऊर्द्ध्वाम् । एति । तिष्ठ । पङ्क्तिः । त्वा । छन्दसाम् । अवतु । त्रिणवत्रयस्त्रि॒ꣳशाविति त्रिणव – त्रयस्त्रि॒ꣳशौ । स्तोमौ । शाक्वररैवते इति शाक्वर–रैवते । सामनी इति । बृहस्पतिः । देवता । वर्चः । द्रविणम् । ईदृङ् । च । अन्यादृङ् । च । एतादृङ् । च । प्रतिदृङ्ङिति प्रति – दृङ् । च । मितः । च । संमित इति सं – मितः । च । सभरा इति स – भराः ॥ शुक्रज्योतिरिति शुक्र – ज्योतिः । च । चित्रज्योतिरिति चित्र – ज्योतिः । च ।

सत्यज्योतिरिति सत्य – ज्योतिः । च । ज्योतिष्मान् । च । सत्यः ।

च । ऋतपा इत्यृत – पाः । च । **25 (50)**

**TS 1.8.13.3**

ऽत्यꣳहाः ।

अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे

स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा श्लोकाय स्वाहा

ऽꣳशाय स्वाहा भगाय स्वाहा क्षेत्रस्य पतये स्वाहा

पृथिव्यै स्वाहा ऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा

चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहा ऽद्भ्यः स्वाहौषधीभ्यः स्वाहा

वनस्पतिभ्यः स्वाहा चराचरेभ्यः स्वाहा परिप्लवेभ्यः स्वाहा

सरीसृपेभ्यः स्वाहा ॥ **26**

**TS 1.8.13.3 (Padam)**

अत्यꣳहा इत्यति–अꣳहाः ॥ अग्नये । स्वाहा । सोमाय । स्वाहा ।

सवित्रे । स्वाहा । सरस्वत्यै । स्वाहा । पूष्णे । स्वाहा । बृहस्पतये ।

स्वाहा । इन्द्राय । स्वाहा । घोषाय । स्वाहा । श्लोकाय । स्वाहा ।

अꣳशाय । स्वाहा । भगाय । स्वाहा । क्षेत्रस्य । पतये । स्वाहा ।

पृथिव्यै । स्वाहा । अन्तरिक्षाय । स्वाहा । दिवे । स्वाहा । सूर्याय ।

स्वाहा । चन्द्रमसे । स्वाहा । नक्षत्रेभ्यः । स्वाहा ।

अद्भ्य इत्यत्–भ्यः । स्वाहा । ओषधीभ्य इत्योषधि–भ्यः । स्वाहा ।

वनस्पतिभ्य इति वनस्पति–भ्यः । स्वाहा । चराचरेभ्यः । स्वाहा ।

परिप्लवेभ्य इति परि – प्लवेभ्यः । स्वाहा । सरीसृपेभ्यः ।

स्वाहा ( ) ॥ **26 (50)**

*(अनुष्टुप्त्व–र्तपाश्च – सरीसृपेभ्यः स्वाहा) (A13)*

**TS 1.8.14.1**

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूया–दमृतमसि मृत्योर्मा पाहि

दिद्योन्मा पाह्यवेष्टा दन्दशूका निरस्तं नमुचेः शिरः ॥

सोमो राजा वरुणो देवा धर्मसुवश्च ये ।

ते ते वाचꣳ सुवन्तां ते ते प्राणꣳ सुवन्तां ते ते चक्षुः सुवन्तां ते ते

श्रोत्रꣳ सुवन्ताꣳ सोमस्य त्वा द्युम्नेनाभि षिञ्चाम्यग्ने – [ ] **27**

**TS 1.8.14.1 (Padam)**

सोमस्य । त्विषिः । असि । तव । इव । मे । त्विषिः । भूयात् ।

अमृतम् । असि । मृत्योः । मा । पाहि । दिद्योत् । मा । पाहि ।

अवेष्टा इत्यव–इष्टाः । दन्दशूकाः । निरस्तमिति निः–अस्तम् ।

नमुचेः । शिरः ॥ सोमः । राजा । वरुणः । देवाः ।

धर्मसुव इति धर्म–सुवः । च । ये ॥ ते । ते । वाचम् । सुवन्ताम् ।

ते । ते । प्राणमिति प्र–अनम् । सुवन्ताम् । ते । ते । चक्षुः ।

सुवन्ताम् । ते । ते । श्रोत्रम् । सुवन्ताम् । सोमस्य । त्वा । द्युम्नेन ।

अभीति । सिञ्चामि । अग्नेः । **27 (50)**

**TS 1.8.14.2**

स्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण मित्रावरुणयोर्वीर्येण

मरुतामोजसा क्षत्राणां क्षत्रपतिरस्यति दिवस्पाहि

समाववृत्रन्न–धरागुदीची–रहिं बुद्ध्नियमनु सञ्चरन्तीस्ताः

पर्वतस्य वृषभस्य पृष्ठे नावश्चरन्ति स्वसिच इयानाः ॥

रुद्र यत्ते क्रयी परं नाम तस्मै हुतमसि यमेष्टमसि ।

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता ( ) बभूव ।

यत्कामास्ते जुहुमस्तन्नो अस्तु वय৺ स्याम पतयो रयीणाम् ॥ **28**

**TS 1.8.14.2 (Padam)**

तेजसा । सूर्यस्य । वर्चसा । इन्द्रस्य । इन्द्रियेण । मित्रावरुणयोरिति

मित्रा – वरुणयोः । वीर्येण । मरुताम् । ओजसा । क्षत्राणाम् ।

क्षत्रपतिरिति क्षत्र – पतिः । असि । अतीति । दिवः । पाहि ।

समाववृत्रन्निति सं – आववृत्रन्न् । अधराक् । उदीचीः । अहिम् ।

बुद्ध्निनयम् । अन्विति । सञ्चरन्तीरिति सं–चरन्तीः । ताः ।

पर्वतस्य । वृषभस्य । पृष्ठे । नावः । चरन्ति । स्वसिच

इति स्व–सिचः । इयानाः ॥ रुद्र । यत् । ते । क्रयि । परम् । नाम ।

तस्मै । हुतम् । असि । यमेष्टमिति यम – इष्टम् । असि ॥

प्रजापत इति प्रजा–पते । न । त्वत् । एतानि । अन्यः । विश्वा ।

जातानि । परीति । ता ( ) । बभूव ॥ यत्कामा इति यत् – कामाः ।

ते । जुहुमः । तत् । नः । अस्तु । वयम् । स्याम । पतयः ।

रयीणाम् ॥ **28 (61)** ***(अग्ने–स्तौ–कादश च) (A14)***

**TS 1.8.15.1**

इन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्त्वया ऽयं वृँत्रं वँद्ध्यान्

मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि यज्ञस्य योगेन

विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि मरुतां प्रसवे जेषमाप्तं मनः समहमिन्द्रियेण वीर्येण पशूनां मन्युरसि तवेव मे मन्युर्भूयान्नमो मात्रे पृथिव्यै मा ऽहं मातरं पृथिवीꣳ हिꣳसिषं मा – [ ] **29**

**TS 1.8.15.1 (Padam)**

इन्द्रस्य । वज्रः । असि । वार्त्रघ्न इति वार्त्र–घ्नः । त्वया । अयम् । वृत्रम् । वद्ध्यात् । मित्रावरुणयोरिति मित्रा – वरुणयोः । त्वा । प्रशास्त्रोरिति प्र–शास्त्रोः । प्रशिषेति प्र–शिषा । युनज्मि । यज्ञस्य । योगेन । विष्णोः । क्रमः । असि । विष्णोः । क्रान्तम् । असि । विष्णोः । विक्रान्तमिति वि – क्रान्तम् । असि । मरुताम् । प्रसव इति प्र – सवे । जेषम् । आप्तम् । मनः । समिति । अहम् । इन्द्रियेण । वीर्येण । पशूनाम् । मन्युः । असि । तव । इव । मे । मन्युः । भूयात् । नमः । मात्रे । पृथिव्यै । मा । अहम् । मातरम् । पृथिवीम् । हिꣳसिषम् । मा । **29 (50)**

**TS 1.8.15.2**

मां माता पृथिवी हि॒ꣳसीदियदस्यायु–रस्यायुर्मे धेह्यूर्गस्यूर्जं मे धेहि युङ्ङसि वर्चो ऽसि वर्चो मयि धेह्यग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहेन्द्रस्य बलाय स्वाहा मरुतामोजसे स्वाहा ह॒ꣳसः शुचिषद् वसुरन्तरिक्ष–सद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद् वरसदृतसद् व्योमसदब्जा गोजा ऋतजा ( ) अद्रिजा ऋतं बृहत् ॥ **30**

**TS 1.8.15.2 (Padam)**

माम् । माता । पृथिवी । हि॒ꣳसीत् । इयत् । असि । आयुः । असि । आयुः । मे । धेहि । ऊर्क् । असि । ऊर्जम् । मे । धेहि । युङ् । असि । वर्चः । असि । वर्चः । मयि । धेहि । अग्नये । गृहपतय इति गृह–पतये । स्वाहा । सोमाय । वनस्पतये । स्वाहा । इन्द्रस्य । बलाय । स्वाहा । मरुताम् । ओजसे । स्वाहा । ह॒ꣳसः । शुचिषदिति शुचि – सत् । वसुः । अन्तरिक्षदित्यन्तरिक्ष – सत् । होता । वेदिषदिति वेदि – सत् । अतिथिः । दुरोणसदिति दुरोण – सत् ॥ नृषदिति नृ – सत् । वरसदिति वर – सत् ।

ऋतसदित्यृत -सत् । व्योमसदिति व्योम - सत् । अब्जा इत्यप् - जाः । गोजा इति गो - जाः । ऋतजा इत्यृत-जाः ( ) । अद्रिजा इत्यद्रि - जाः । ऋतं । बृहत् ॥ **30 (53)**

*(हि॒ꣳसिषं म-र्तजा-स्त्रीणि च) (A15)*

**TS 1.8.16.1**

मित्रो ऽसि वरुणो ऽसि समहं ँविश्वैर्देवैः क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि स्योनामा सीद सुषदामा सीद मा त्वा हिꣳसीन्मा मा हिꣳसीन्नि षसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतु र्ब्रह्मा(३)न् त्वꣳ राजन् ब्रह्मा ऽसि सविता ऽसि सत्यसवो ब्रह्मा(3)न् त्वꣳ राजन् ब्रह्मा ऽसीन्द्रो ऽसि सत्यौजा - [ ] **31**

**TS 1.8.16.1 (Padam)**

मित्रः । असि । वरुणः । असि । समिति । अहम् । विश्वैः । देवैः । क्षत्रस्य । नाभिः । असि । क्षत्रस्य । योनिः । असि । स्योनाम् । एति । सीद । सुषदामिति सु - सदाम् । एति । सीद । मा । त्वा । हिꣳसीत् । मा । मा । हिꣳसीत् । नीति । ससाद । धृतव्रत इति धृत - व्रतः । वरुणः । पस्त्यासु । एति ।

साम्राज्यायेति सां–राज्याय । सुक्रतुरिति सु– क्रतुः । ब्रह्मा(3)न् ।
त्वम् । राजन्न् । ब्रह्मा । असि । सविता । असि । सत्यसव इति
सत्य – सवः । ब्रह्मा(3)न् । त्वम् । राजन्न् । ब्रह्मा । असि । इन्द्रः ।
असि । सत्यौजा इति सत्य – ओजाः । **31 (50)**

**TS 1.8.16.2**

ब्रह्मा(3)न् त्वꣳ राजन् ब्रह्मा ऽसि मित्रो ऽसि सुशेवो ब्रह्मा(3)न् त्वꣳ
राजन् ब्रह्मा ऽसि वरुणो ऽसि सत्यधर्मेन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्तेन
मे रद्ध्य दिशो ऽभ्ययꣳ राजा ऽभूथ् सुश्लोकाँ(4) सुमङ्गलाँ(4)
सत्यराजा(3)न् ।

अपां नप्त्रे स्वाहोर्जो नप्त्रे स्वाहा ऽग्नये गृहपतये स्वाहा ॥ **32**

**TS 1.8.16.2 (Padam)**

ब्रह्मा(3)न् । त्वम् । राजन्न् । ब्रह्मा । असि । मित्रः । असि । सुशेव
इति सु – शेवः । ब्रह्मा(3)न् । त्वम् । राजन्न् । ब्रह्मा । असि ।
वरुणः । असि । सत्यधर्मेति सत्य – धर्मा । इन्द्रस्य । वज्रः ।
असि । वार्त्रघ्न इति वार्त्र – घ्नः । तेन । मे । रद्ध्य । दिशः ।

अभीति । अयम् । राजा । अभूत् । सुश्लोकाँ(4) इति सु – श्लोकाँ(4) । सुमङ्गलाँ(4) इति सु – मङ्गलाँ(4) । सत्यराजा(3)निति सत्य – राजा(3)न् ॥ अपाम् । नप्त्रे । स्वाहा । ऊर्जः । नप्त्रे । स्वाहा । अग्नये । गृहपतय इति गृह – पतये । स्वाहा ॥ **32 (40)** *(सत्यौजा–श्चत्वारि(ग्͡)शच्च )(A16)*

**TS 1.8.17.1**

आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा सारस्वतं चरुं वथ्सतरी दक्षिणा सावित्रं द्वादशकपाल–मुपद्ध्वस्तो दक्षिणा पौष्णं चरु(ग्͡) श्यामो दक्षिणा बार्.हस्पत्यं चरु(ग्͡) शितिपृष्ठो दक्षिणैन्द्र–मेकादशकपाल–मृषभो दक्षिणा वारुणं दशकपालं महानिरष्टो दक्षिणा सौम्यं चरुं बभ्रुर्दक्षिणा त्वाष्ट्रमष्टाकपाल(ग्͡) शुण्ठो दक्षिणा वैष्णवं त्रिकपालं वामनो दक्षिणा ॥ **33**

**TS 1.8.17.1 (Padam)**

आग्नेयम् । अष्टाकपालमित्यष्टा–कपालम् । निरिति । वपति । हिरण्यम् । दक्षिणा । सारस्वतम् । चरुम् । वथ्सतरी । दक्षिणा ।

सावित्रम् । द्वादशकपालमिति द्वादश – कपालम् । उपद्ध्वस्त

इत्युप – ध्वस्तः । दक्षिणा । पौष्णम् । चरुम् । श्यामः । दक्षिणा ।

बार्.हस्पत्यम् । चरुम् । शितिपृष्ठ इति शिति – पृष्ठः । दक्षिणा ।

ऐन्द्रम् । एकादशकपालमित्येकादश–कपालम् । ऋषभः । दक्षिणा ।

वारुणम् । दशकपालमिति दश – कपालम् । महानिरष्ट इति

महा–निरष्टः । दक्षिणा । सौम्यम् । चरुम् । बभ्रुः । दक्षिणा ।

त्वाष्ट्रम् । अष्टाकपालमित्यष्टा – कपालम् । शुण्ठः । दक्षिणा ।

वैष्णवम् । त्रिकपालमिति त्रि – कपालम् । वामनः ।

दक्षिणा ॥ **33 (42)**

*(आग्नेयं॑ हिरण्यं॑ सारस्वतं–द्विचत्वारिं॑शत् )(A17)*

**TS 1.8.18.1**

सद्यो दीक्षयन्ति सद्यः सोमं क्रीणन्ति पुण्डरिस्रजां प्र यच्छति

दशभिर्वथ्सतरैः सोमं क्रीणाति दशपेयो भवति शतं ब्राह्मणाः

पिबन्ति सप्तदश७ स्तोत्रं भवति प्राकाशावद्ध्वर्यवे ददाति

स्रज–मुद्गात्रे रुक्मं॑ होत्रे ऽश्वं प्रस्तोतृप्रतिहर्तृभ्यांद्वादश पष्ठौही

ब्रह्मणे वशां मैत्रावरुणायर्.षभं ब्राह्मणाच्छ॑ꣳसिने वाससी
नेष्टापोतृभ्या॑ꣳ स्थूरि यवाचित–मच्छावाकायानड्वाह–मग्नीधे
भार्गवो होता भवति श्रायन्तीयं ब्रह्मसामं भवति वारवन्तीय– ( )
–मग्निष्टोमसामꣳ सारस्वती–रपो गृह्णाति ॥ **34**

**TS 1.8.18.1 (Padam)**

सद्यः । दीक्षयन्ति । सद्यः । सोमम् । क्रीणन्ति । पुण्डरिस्रजाम् ।
प्रेति । यच्छति । दशभिरिति दश–भिः । वथ्सतरैः । सोमम् ।
क्रीणाति । दशपेय इति दश–पेयः । भवति । शतम् । ब्राह्मणाः ।
पिबन्ति । सप्तदशमिति सप्त – दशम् । स्तोत्रम् । भवति ।
प्राकाशौ । अद्ध्वर्यवे । ददाति । स्रजम् । उद्गात्र इत्युत्–गात्रे ।
रुक्मम् । होत्रे । अश्वम् । प्रस्तोतृप्रतिहर्तृभ्यामिति
प्रस्तोतृप्रतिहर्तृ–भ्यां । द्वादश । पष्ठौहीः । ब्रह्मणे । वशाम् ।
मैत्रावरुणायेति मैत्रा – वरुणाय । ऋषभम् । ब्राह्मणाच्छꣳसिने ।
वाससी इति । नेष्टापोतृभ्यामिति नेष्टापोतृ – भ्याम् । स्थूरि ।
यवाचितमिति यव – आचितम् । अच्छावाकाय । अनड्वाहम् ।

अग्नीध इत्यग्नि – इधे । भार्गवः । होता । भवति । श्रायन्तीयम् ।

ब्रह्मसाममिति ब्रह्म – सामम् । भवति । वारवन्तीयमिति

वार – वन्तीयम् ( ) । अग्निष्टोमसाममित्यग्निष्टोम – सामम् ।

सारस्वतीः । अपः । गृह्णाति ॥ **34 (54)**

*(वारवन्तीयं चत्वारि च) (A18)*

**TS 1.8.19.1**

आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणैन्द्र–मेकादशकपालमृषभो दक्षिणा वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा मैत्रावरुणी–मामिक्षाँ वशा दक्षिणा बार्.हस्पत्यं चरु॒ँ शितिपृष्ठो दक्षिणा ऽऽदित्यां मल्.हां गर्भिणीमा लभते मारुतीं पृश्ञिं पष्ठौही–मश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निर्वपति सरस्वते सत्यवाचे चरु॒ँ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालं तिसृधन्व॒ँ शुष्कदृति र्दक्षिणा ॥ **35**

**TS 1.8.19.1 (Padam)**

आग्नेयम् । अष्टाकपालमित्यष्टा–कपालम् । निरिति । वपति ।

हिरण्यम् । दक्षिणा । ऐन्द्रम् । एकादशकपालमित्येकादश–कपालम् ।

ऋषभः । दक्षिणा । वैश्वदेवमिति वैश्व–देवम् । चरुम् । पिशङ्गी ।

पष्ठौही । दक्षिणा । मैत्रावरुणीमिति मैत्रा–वरुणीम् । आमिक्षाम् ।

वशा । दक्षिणा । बार्.हस्पत्यम् । चरुम् । शितिपृष्ठ इति

शिति–पृष्ठः । दक्षिणा । आदित्याम् । मल्.हाम् । गर्भिणीम् । एति ।

लभते । मारुतीम् । पृश्ञिम् । पष्ठौहीम् । अश्विभ्यामित्यश्वि–भ्याम् ।

पूष्णे । पुरोडाशम् । द्वादशकपालमिति द्वादश – कपालम् । निरिति ।

वपति । सरस्वते । सत्यवाच इति सत्य – वाचे । चरुम् । सवित्रे ।

सत्यप्रसवायेति सत्य – प्रसवाय । पुरोडाशम् । द्वादशकपालमिति

द्वादश – कपालम् । तिसृधन्वमिति तिसृ – धन्वम् ।

शुष्कदृतिरिति शुष्क – दृतिः । दक्षिणा ॥ **35 (47)**

*(अग्नेय॒ं हिरण्यमैद्रमृषभो वैश्वदेवं पिशङ्गी*

*बार्.हस्पत्य॒ं–सप्तचत्वारि॒ंशत्) (A19)*

**TS 1.8.20.1**

आग्नेयमष्टाकपालं निर्वपति सौम्यं चरु॒ं सावित्रं द्वादशकपालं

बार्.हस्पत्यं चरुं त्वाष्ट्रमष्टाकपालं वैँश्वानरं द्वादशकपालं दक्षिणो

रथवाहनवाहो दक्षिणा सारस्वतं चरुं निर्वपति पौष्णं चरुं मैत्रं चरुं

ँवारुणं चरुं क्षैत्रपत्यं चरुमादित्यं चरुमुत्तरो रथवाहनवाहो

दक्षिणा ॥ **36**

**TS 1.8.20.1 (Padam)**

आग्नेयम् । अष्टाकपालमित्यष्टा–कपालम् । निरिति । वपति ।

सौम्यम् । चरुम् । सावित्रम् । द्वादशकपालमिति द्वादश–कपालम् ।

बार्.हस्पत्यम् । चरुम् । त्वाष्ट्रम् । अष्टाकपालमित्यष्टा – कपालम् ।

वैश्वानरम् । द्वादशकपालमिति द्वादश – कपालम् । दक्षिणः ।

रथवाहनवाह इति रथवाहन–वाहः । दक्षिणा । सारस्वतम् । चरुम् ।

निरिति । वपति । पौष्णम् । चरुम् । मैत्रम् । चरुम् । वारुणम् ।

चरुम् । क्षैत्रपत्यमिति क्षैत्र – पत्यम् । चरुम् । आदित्यम् । चरुम् ।

उत्तर इत्युत् – तरः । रथवाहनवाह इति रथवाहन – वाहः ।

दक्षिणा ॥ **36 (34)**

*(आग्नेयꣳ सौम्यं बार्.हस्पत्यं–चतुस्त्रिꣳशत्) (A20)*

**TS 1.8.21.1**

स्वाद्वीं त्वा स्वादुना तीव्रां तीव्रेणामृताममृतेन सृजामि सꣳसोमेन

सोमो ऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व

पुनातु ते परिस्रुत॑ सोम॑ सूर्यस्य दुहिता ।
वारेण शश्वता तना ॥
वायुः पूतः पवित्रेण प्रत्यङ् ख्सोमो अतिद्रुतः ।
इन्द्रस्य युज्यः सखा ॥
कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं ँवियूय ।
इहेहैषां कृणुत भोजनानि ( ) ये बर्.हिषो नमोवृक्तिं न जग्मुः ॥
आश्विनं धूम्रमा लभते सारस्वतं मेषमैन्द्रमृषभ–मैन्द्र–
मेकादशकपालं निर्वपति सावित्रं द्वादशकपालं ँवारुणं दश कपाल॑
सोमप्रतीकाः पितरस्तृप्णुत वडबा दक्षिणा ॥ **37**

**TS 1.8.21.1 (Padam)**

स्वाद्वीम् । त्वा । स्वादुना । तीव्राम् । तीव्रेण । अमृताम् । अमृतेन ।
सृजामि । समिति । सोमेन । सोमः । असि ।
अश्विभ्यामित्यश्वि–भ्याम् । पच्यस्व । सरस्वत्यै । पच्यस्व ।
इन्द्राय । सुत्रांण इति सु – त्रांणे । पच्यस्व । पुनातु । ते ।
परिस्रुतमिति परि – स्रुतम् । सोमम् । सूर्यस्य । दुहिता ॥ वारेण ।

शश्वता । तना ॥ वायुः । पूतः । पवित्रेण । प्रत्यङ् । सोमः ।
अतिद्रुत इत्यति-द्रुतः ॥ इन्द्रस्य । युज्यः । सखा ॥ कुवित् । अङ्ग ।
यवमन्त इति यव-मन्तः । यवम् । चित् । यथा । दान्ति ।
अनुपूर्वमित्यनु - पूर्वम् । वियूयेति वि - यूय ॥ इहेहेतीह - इह ।
एषाम् । कृणुत । भोजनानि ( ) । ये । बर्.हिषः । नमोवृक्तिमिति
नमः - वृक्तिम् । न । जग्मुः ॥ आश्विनम् । धूम्रम् । एति । लभते ।
सारस्वतम् । मेषम् । ऐन्द्रम् । ऋषभम् । ऐन्द्रम् ।
एकादशकपालमित्येकादश-कपालम् । निरिति । वपति । सावित्रम् ।
द्वादशकपालमिति द्वादश - कपालम् । वारुणम् ।
दशकपालमिति दश - कपालम् । सोमप्रतीका इति
सोम - प्रतीकाः । पितरः । तृप्णुत । वडबा । दक्षिणा ॥ **37 (76)**

*(भोजनानि-षड्विꣳशतिश्च) (A21)*

**TS 1.8.22.1**

अग्नाविष्णू महि तद्वां महित्वं ँवीतं घृतस्य गुह्यानि नाम ।
दमेदमे सप्त रत्ना दधाना प्रति वां जिह्वा घृतमा चरण्येत् ॥

अग्नाविष्णू महि धाम प्रियं ँवां ँवीथो घृतस्य गुह्या जुषाणा ।

दमेदमे सुष्टुतीर्वावृधाना प्रति वां जिह्वा घृतमुच्चरण्येत् ॥

प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती ।

धीना-मवित्र्यवतु ।

आ नो दिवो बृहतः - [ ] **38**

**TS 1.8.22.1 (Padam)**

अग्नाविष्णू इत्यग्ना - विष्णू । महि । तत् । वाम् । महित्वमिति महि - त्वम् । वीतम् । घृतस्य । गुह्यानि । नाम ॥ दमेदम इति दमे-दमे । सप्त । रत्ना । दधाना । प्रतीति । वाम् । जिह्वा । घृतम् । एति । चरण्येत् ॥ अग्नाविष्णू इत्यग्ना-विष्णू । महि । धाम । प्रियम् । वाम् । वीथः । घृतस्य । गुह्या । जुषाणा ॥ दमेदम इति दमे - दमे । सुष्टुतीरिति सु-स्तुतीः । वावृधाना । प्रतीति । वाम् । जिह्वा । घृतम् । उदिति । चरण्येत् ॥ प्रेति । नः । देवी । सरस्वती । वाजेभिः । वाजिनीवतीति वाजिनी - वती ॥ धीनाम् । अवित्री । अवतु ॥ एति । नः । दिवः । बृहतः । **38 (50)**

**TS 1.8.22.2**

पर्वतादा सरस्वती यजता गन्तु यज्ञं ।

हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु ॥

बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य ।

रास्व रत्नानि दाशुषे ॥

एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः ।

बृहस्पते सुप्रजा वीरवन्तो वय७ स्याम पतयो रयीणां ॥

बृहस्पते अति यदर्यो अर्.हाद् द्युमद्विभाति क्रतुमज्जनेषु ।

यद् दीदयच्छवस– [ ] **39**

**TS 1.8.22.2 (Padam)**

पर्वतात् । एति । सरस्वती । यजता । गन्तु । यज्ञम् ॥ हवम् । देवी ।

जुजुषाणा । घृताची । शग्माम् । नः । वाचम् । उशती । शृणोतु ॥

बृहस्पते । जुषस्व । नः । हव्यानि । विश्वदेव्येति विश्व–देव्य ॥

रास्व । रत्नानि । दाशुषे ॥ एवा । पित्रे । विश्वदेवायेति विश्व–देवाय ।

वृष्णे । यज्ञैः । विधेम । नमसा । हविर्भिरिति हविः – भिः ॥

बृहस्पते । सुप्रजा इति सु – प्रजाः । वीरवन्त इति वीर – वन्तः ।

वयम् । स्याम । पतयः । रयीणाम् ॥ बृहस्पते । अतीति । यत् ।
अर्यः । अर्.हात् । द्युमदिति द्यु – मत् । विभातीति वि – भाति ।
क्रतुमदिति क्रतु – मत् । जनेषु ॥ यत् । दीदयत् । शवसा । **39 (50)**

**TS 1.8.22.3**

र्तप्रजात तदस्मासु द्रविणं धेहि चित्रं ।
आ नो मित्रावरुणा घृतैर्गव्यूति–मुक्षतं ।
मद्ध्वा रजा॑ꣳसि सुक्रतू ॥
प्र बाहवा सिसृतं जीवसे न आ नो गव्यूति–मुक्षतं घृतेन ।
आ नो जने श्रवयतं ँयुवाना श्रुतं मे मित्रावरुणा हवेमा ॥
अग्निं ँवः पूर्व्यं गिरा देवमीडे वसूनां ।
सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसं ॥
मक्षू देववतो रथः – [ ] **40**

**TS 1.8.22.3 (Padam)**

ऋतप्रजातेत्यृत–प्रजात । तत् । अस्मासु । द्रविणम् । धेहि ।
चित्रम् ॥ एति । नः । मित्रावरुणेति मित्रा–वरुणा । घृतैः ।
गव्यूतिम् । उक्षतम् ॥ मद्ध्वा । रजा॑ꣳसि । सुक्रतू इति सु–क्रतू ॥

प्रेति । बाहवा । सिसृतम् । जीवसे । नः । एति । नः । गव्यूतिम् । उक्षतम् । घृतेन ॥ एति । नः । जने । श्रवयतम् । युवाना । श्रुतम् । मे । मित्रावरुणेति मित्रा – वरुणा । हवा । इमा ॥ अग्निम् । वः । पूर्व्यम् । गिरा । देवम् । ईडे । वसूनाम् ॥ सपर्यन्तः । पुरुप्रियमिति पुरु–प्रियम् । मित्रम् । न । क्षेत्रसाधसमिति क्षेत्र – साधसम् ॥ मक्षु । देववत इति देव – वतः । रथः । **40 (50)**

**<u>TS 1.8.22.4</u>**

शूरो वा पृथ्सु कासु चित् ।
देवानां ँय इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥
न यजमान रिष्यसि न सुन्वान न देवयो ॥
असदत्र सुवीर्यमुत त्यदाश्वश्वियं ॥
नकिष्टं कर्मणा नशन्न प्र योषन्न योषति ॥
उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः ।
पृणन्तं च पपुरिं च – [ ] **41**

**TS 1.8.22.4 (Padam)**

शूरः । वा । पृथ्स्विति पृत्–सु । कासु । चित् ॥ देवानाम् । यः ।
इत् । मनः । यजमानः । इयक्षति । अभीति । इत् । अयज्वनः ।
भुवत् ॥ न । यजमान । रिष्यसि । न । सुन्वान । न । देवयो इति
देव–यो ॥ असत् । अत्र । सुवीर्यमिति सु – वीर्यम् । उत । त्यत् ।
आश्वश्वियमित्याशु–अश्वियम् ॥ नकिः । तम् । कर्मणा । नशत् । न ।
प्रेति । योषत् । न । योषति ॥ उपेति । क्षरन्ति । सिन्धवः । मयोभुव
इति मयः – भुवः । ईजानम् । च । यक्ष्यमाणम् । च । धेनवः ॥
पृणन्तम् । च । पपुरिम् । च । **41 (50)**

**TS 1.8.22.5**

श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः ॥
सोमारुद्रा वि वृहतं ँविषूचीममीवा या नो गय–माविवेश ।
आरे बाधेथां निर्.ऋतिं पराचैः कृतं चिदेनः प्र मुमुक्त–मस्मत् ॥
सोमारुद्रा युव–मेतान्यस्मे विश्वा तनूषु भेषजानि धत्तं ।
अव स्यतं मुञ्चतं ँयन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥
सोमापूषणा जनना रयीणां जनना दिवो जनना ( ) पृथिव्याः ।

जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिं ॥

इमौ देवौ जायमानौ जुषन्तेमौ तमा॑ꣳसि गूहता–मजुष्टा ।

आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्त्रियासु ॥ **42**

**TS 1.8.22.5 (Padam)**

श्रवस्यवः । घृतस्य । धाराः । उपेति । यन्ति । विश्वतः ॥ सोमारुद्रेति सोमा–रुद्रा । वीति । वृहतम् । विषूचीम् । अमीवा । या । नः । गयम् । आविवेशेत्या – विवेश ॥ आरे । बाधेथाम् । निर्.ऋतिमिति निः – ऋतिम् । पराचैः । कृतम् । चित् । एनः । प्रेति । मुमुक्तम् । अस्मत् ॥ सोमारुद्रेति सोमा–रुद्रा । युवम् । एतानि । अस्मे इति । विश्वा । तनूषु । भेषजानि । धत्तम् ॥ अवेति । स्यतम् । मुञ्चतम् । यत् । नः । अस्ति । तनूषु । बद्धम् । कृतम् । एनः । अस्मत् । सोमापूषणेति सोमा – पूषणा । जनना । रयीणाम् । जनना । दिवः । जनना ( ) । पृथिव्याः ॥ जातौ । विश्वस्य । भुवनस्य । गोपौ । देवाः । अकृण्वन्न् । अमृतस्य । नाभिम् ॥ इमौ । देवौ । जायमानौ । जुषन्त । इमौ । तमा॑ꣳसि । गूहताम् । अजुष्टा ॥ आभ्याम् । इन्द्रः ।

प॒क्वम् । आ॒मासु॑ । अ॒न्तः । सो॒मा॒पू॒षभ्या॒मिति॑ सोमापू॒ष – भ्या॒म् । ज॒न॒त् । उ॒स्रिया॑सु ॥ **42 (75)**

**(बृ॒ह॒तः–शव॑सा॒–रथ॒ः–पपु॑रिं च–दि॒वो जन॑ना॒–पञ्च॑वि॒ꣳशतिश्च)**

*(A22)*

=========================

**Prasna Korvai with starting Padams of 1 to 22 Anuvaakams :-**

अनुमत्या–आग्नेय–मैन्द्राग्न–मग्नये–सोमाय–प्रतिपूरुष–मैन्द्राग्नं–धात्रे – बार्.हस्पत्य–मग्नये–ऽर्थतो–देवीः–समिधं–सोमस्ये–न्द्रस्य –मित्र–आग्नेयं–सद्य–आग्नेयं–माग्नेयं–स्वाद्वीं त्वा–ऽग्नाविष्णू–द्वाविंशतिः । )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(अनुमत्यै–यथाऽसति–देवीरापो–मित्रोऽसि–शूरो वा–द्विचत्वारिंशत् ।)

**First and Last Padam of Eighth Prasnam :-**

(अनुमत्या–उस्रियासु ।)

**Kanda Korvai with starting Padams of Eight Prasnas of Kandam 1 :-**

(इ॒ष–आपो॑–दे॒वस्या–ऽऽ द॑दे–देवासु॒राः–सं त्वा॑–पाकय॒ज्ञ–म॑नुमत्यै ।)

॥ हरि॑ः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहिता प्रथमकाण्डे पद पाठे

अष्टमः प्रश्नः समाप्तः ॥

॥ इति प्रथमं काण्डं ॥

**Details of Panchati and Padam for Kandam 1 , Prasanam 8 – (TS 1.8)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 2 | 84 |
| Anuvakam 2 | 1 | 18 |
| Anuvakam 3 | 1 | 70 |
| Anuvakam 4 | 2 | 80 |
| Anuvakam 5 | 3 | 144 |
| Anuvakam 6 | 2 | 103 |
| Anuvakam 7 | 2 | 95 |
| Anuvakam 8 | 1 | 58 |
| Anuvakam 9 | 3 | 133 |
| Anuvakam 10 | 2 | 125 |
| Anuvakam 11 | 1 | 61 |
| Anuvakam 12 | 3 | 141 |
| Anuvakam 13 | 3 | 150 |
| Anuvakam 14 | 2 | 111 |
| Anuvakam 15 | 2 | 103 |
| Anuvakam 16 | 2 | 90 |
| Anuvakam 17 | 1 | 42 |
| Anuvakam 18 | 1 | 54 |
| Anuvakam 19 | 1 | 47 |
| Anuvakam 20 | 1 | 34 |
| Anuvakam 21 | 1 | 76 |
| Anuvakam 22 | 5 | 275 |
| Total → | 42 | 2094 |

**Notes:**

- **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site “www.vedavms.in”**